# 65 - पञ्चषष्टितम दशकम्
## गोपीकानां समागमन वर्णनम्

गोपीजनाय कथितं निय मावसाने
मारोत्सवं त्व मथ साधयितुं प्रवृत्तः ।
सान्द्रेण चान्द्र महसा शिशिरी कृताशे
प्रापूरयो मुरलिकां यमुना वनान्ते ॥ ॥65-1॥

सम्मूर्छनाभि रुदित स्वर मण्डलाभिः
सम्मूर्छयन्त मखिलं भुवनान्त रालम् ।
त्वद् वेणुनाद मुपकर्ण्य विभो तरुण्यः
तत् तादृशं कमपि चित्त विमोह मापुः ॥ ॥65-2॥

ता गेह कृत्य निरतास् तनय प्रसक्ताः
कान्तोप सेवन पराश्च सरोरु हाक्ष्यः ।
सर्वं विसृज्य मुरलीरव मोहितास् ते
कान्तार देश मयि कान्त तनो समेताः ॥ ॥65-3॥

काश्चिन् निजाङ्ग परिभूषण मादधानाः
वेणु प्रणाद मुपकर्ण्य कृतार्ध भूषाः ।
त्वा मागता ननु तथैव विभूषिताभ्यः
ता एव संरुरुचिरे तव लोचनाय ॥ ॥65-4॥

हारं नितम्ब भुवि काचन धारयन्ती
काञ्चीं च कण्ठ भुवि देव समागता त्वाम् ।
हारित्व मात्म जघनस्य मुकुन्द तुभ्यं
व्यक्तं बभाष इव मुग्ध मुखी विशेषात् ॥ ॥65-5॥

काचित् कुचे पुन रसज्जित कञ्चुलीका
व्यामोहतः परवधूभि रलक्ष्यमाणा ।
त्वा माययौ निरुपम प्रणयाति भार
राज्याभिषेक विधये कलशीध रेव ॥ ॥65-6॥

काश्चित् गृहात् किल निरेतु मपारयन्त्य:
त्वामेव देव हृदये सुदृढं विभाव्य ।
देहं विधूय परचित् सुख रूप मेकं
त्वा माविशन् परमिमा ननु धन्य धन्या: ॥ ॥65-7॥

जारात्मना न परमात्म तया स्मरन्त्य:
नार्यो गता: परम हंस गतिं क्षणेन ।
तं त्वां प्रकाश परमात्म तनुं कथञ्चित्
चित्ते वहन् अमृत मश्रम मश्नुवीय ॥ ॥65-8॥

अभ्यागताभि रभितो व्रज सुन्दरीभि:
मुग्ध स्मितार्द्र वदन: करुणा वलोकी ।
निस्सीम कान्ति जलधिस् त्व मवेक्ष्यमाण:
विश्वैक हृद्य हर मे पवनेश रोगान् ॥ ॥65-9॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥